नारायण कवचम्

श्री राज उवाच

यया गुप्तः सहस्त्राक्षः सवाहान् रिपु सैनिकान् ।
क्रीडन्न् इव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १ ॥

भगवंस्तन् मम आख्याहि वर्म नारायणात्मकम् ।
यथाततायिनः शत्रून् येन गुप्तोऽजयन् मृधे ॥ २ ॥

श्री शुक उवाच

वृतः पुरोहितस् त्वाष्ट्रो महेन्द्राया अनुपृच्छते ।
नारायणाख्यं वर्माह तद् इहैकमनाः शृणु ॥ ३ ॥

विश्वरूप उवाच

धौताङ्घ्रि पाणिर् आचम्य सपवित्र ।
उदङ्मुखः कृत स्व अङ्ग करन्यासो ॥ ४ ॥

मन्त्राभ्यां वाग्यतः शुचिः नारायणं परं वर्म ।
सन्नह्येद् भय आगते पादयोर् जानुनोर् ऊर्वोरूः ॥ ५ ॥

उदरे हृद्यथोरसि मुखे शिरस्यानुपूर्व्याद् ओंकारादीनि विन्यसेत् ।
ओं नमो नारायणायेति विपर्ययं अथापि वा ॥ ६ ॥

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तर शुचिः ॥

करन्यासं ततः कुर्याद् द्वादषाक्षर विद्यया ।
प्रणवादि यकारन्तं अन्गुल्य अन्गुष्ठ पर्वसु ॥ ७ ॥

न्यसेद् हृदय ओन्कारं विकारं अनु मूर्धनि ।
षकारं तु भ्रुवोर्मध्ये णकारं शिखाया दिशेत् ॥ ८ ॥

वेकारं नेत्रयोः युञ्ज्यान्नकारं सर्वसन्धिषु ।
मकारं अस्त्रं उद्दिश्य मन्त्रमूर्तिर् भवेद् बुधः ॥ ९ ॥

सविसर्गं फडन्तं तत्सर्व दिक्षु विनिर्दिशेत् ।
ओं विष्णवे नम इति ॥ १० ॥

आत्मानं परमं ध्यायेत् ध्येयं षट्शक्तिभिर्युतम् ।
विद्या तेजः तपोमूर्तिं इमं मन्त्रं उदाहरेत ॥ ११ ॥

ओं हरिर्विदध्यान् मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।
दरारि चर्मासि गदेषु चाप पाशान् दधानोः अष्टगुणोः अष्टबाहुः ॥ १२ ॥

जलेषु मां रक्षतु मत्स्य मूर्तिर्यादो गणेभ्यो वरुणस्य पाशात् ।
स्थलेषु मायावटु वामनोऽव्यात् त्रिविक्रमः खेऽवतु विश्वरूपः ॥ १३ ॥

दुर्गेष्वटव्याजि मुखादिषु प्रभुः पायान् नृसिंहोऽसुर यूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ १४ ॥

रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीत धरो वराहः ।
रामोऽद्रि कूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद् भरताग्रजोऽस्मान् ॥ १५ ॥

मां उग्र धर्मात् अखिलात् प्रमादान्नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयोगाद् अथ योगनाथः पायाद् गुणेशः कपिलः कर्मबन्धात् ॥ १६ ॥

सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ।
देवर्षिवर्यः पुरुषार्चनान्तरात् कूर्मो हरिर्मां निरयाद् अशेषात् ॥ १७ ॥

धन्वन्तरिः भगवान् पातु अपथ्यात् द्वन्द्वाद् भयात् ऋषभो निर्जितात्मा ।
यज्ञश्च लोकादवतात् जनान्तात् बलो गणात् क्रोधवशाद् अहीन्द्रः ॥ १८ ॥

द्वैपायनो भगवान् अप्रबोधाद् बुद्धस्तु पाषण्ड गण प्रमादात् ।
कल्कि: कले: कालमलात् प्रपातु धर्मावनायोरू कृतावतार: ॥ १९ ॥

मां केशवो गदया प्रातरव्याद् गोविन्द आसन्गवं आत्तवेणु: ।
नारायण प्राह्ण उदात्तशक्ति: मध्यन्दिने विष्णुररीन्द्रपाणि: ॥ २० ॥

देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम् ।
दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभ: ॥ २१ ॥

श्रीवत्स धामापररात्र ईश: प्रत्यूष ईशोऽसि धरो जनार्दन: ।
दामोदरोऽव्यादनुसन्ध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्ति: ॥ २२ ॥

चक्रं युगान्तानल तिग्मनेमि भ्रमत् समन्ताद् भगवत् प्रयुक्तम् ।
दन्दग्धि दन्दग्ध्य् अरि सैन्यं आशु कक्षं यथा वात सखो हुताश: ॥ २३ ॥

गदेऽशनि स्पर्शन विस्फुलिङ्गे निष्पिण्ढि निष्पिण्ढ्यजित प्रियासि ।
कूष्माण्ड वैनायक यक्षरक्षो भूतग्रहांश्चूर्णय चूर्णयारीन् ॥ २४ ॥

त्वं यातुधान प्रमथ प्रेत मातृ पिशाच विप्र ग्रह घोर दृष्टीन् ।
दरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनोऽरे: हृदयानि कम्पयन् ॥ २५ ॥

त्वं तिग्मधारासि वरारि सैन्यं ईश प्रयुक्तो मम चिन्धि चिन्धि ।
चक्षूंषि चर्मञ्चत चन्द्र चादय द्विषां अघोनां हर पाप चक्षुषाम् ॥ २६ ॥

यन् नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च ।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव च ॥ २७ ॥

सर्वाण्य एतानि भगन्नाम रूपानु कीर्तनात् ।
प्रयान्तु सङ्क्षयं सद्यो ये न: श्रेय: प्रतीपका: ॥ २८ ॥

गरुडो भगवान् स्तोत्रस्तोभश्छन्दोमय: प्रभु: ।
रक्षत्व शेष कृच्छ्रेभ्यो विष्वक्सेन: स्वनामभि: ॥ २९ ॥

सर्व आपद्भ्यो हरेर्नामरूप याना युधानि नः ।
बुद्धीन्द्रिय मनः प्राणान् पान्तु पार्षदभूषणाः ॥ ३० ॥

यथा हि भगवान् एव वस्तुतः सद् असच्च यत् ।
सत्यनानेन नः सर्वे यान्तु नाशं उपद्रवाः ॥ ३१ ॥

यथैकात्म्य अनुभावानां विकल्परहितः स्वयम् ।
भूषणायुध लिङ्गाख्या धत्ते शक्तीः स्वमायया ॥ ३२ ॥

तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥

विदिक्षु दिक्षूर्ध्वं अधः समन्तात् अन्तर्बहिर् भगवान् नारसिंहः ।
प्रहापयन् लोकभयं स्वनेन स्वतेजसा ग्रस्त समस्त तेजाः ॥ ३४ ॥

मघवन्न् इदं आख्यातं वर्म नारायणात्मकम् ।
विजेष्यसेऽञ्जसा येन दंशितोऽसुर यूथपान् ॥ ३५ ॥

एतत् धारयमाणस्तु यं यं पश्यति चक्षुषा ।
पादा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते ॥ ३६ ॥

न कुतश्चिद् भयं तस्य विद्यां धारयतो भवेत् ।
राज दस्यु ग्रहादिभ्यो व्याध्य् आदिभ्यश्च कर्हिचित् ॥ ३७ ॥

इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः ।
योग धारणया स्वाङ्गं जहौ स मरूधन्वनि ॥ ३८ ॥

तस्योपरि विमानेन गन्धर्वपतिर् एकदा ।
ययौ चित्ररथः स्त्रीर्भिवृतो यत्र द्विजक्षयः ॥ ३ ९॥

गगनान् न्यपतत् सद्यः सविमानो ह्यवाक् शिराः ।
स वालिखिल्य वचनाद् अस्थीन्य् आदाय विस्मितः ।
प्रास्य प्राची सरस्वत्यां स्नात्वा धाम स्वं अन्वगात् ॥ ४० ॥

श्री शुक उवाच

य इदं शृणुयात् काले यो धारयति चादृतः ।
तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥ ४१ ॥

एतां विद्यां अधिगतो विश्वरूपात् शतक्रतुः ।
त्रैलोक्य लक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४२ ॥

॥ इति श्री नारायण कवचं सम्पूर्णम् ॥
(श्रीमद् भागवत पुराण स्कन्ध ६ अध्याय ८)